नं. — ५००३

नाम. बृहदारण्यक व्याख्या

× × × ×

पत्र ८ — सं. ×

विषय. उपनिषत्.

बृहदारण्यकव्याख्या

५००३



5003

F. = 8

॥ ओं श्रीसदानंदाय नमः ॥ मधुकांडे तावत्तत्त्वानुप्रविष्टेश्वरो विद्यायाः स्वरूपं समापन्न इति तन्नामरूपं त्यक्त्वा तमो[illegible] इत्यादिना संपुनस्तस्यैवाधि
ष्ठानिरासेन स्वरूपावगमनं चत्वार्यागमप्रधानमध्यमेन निर्धारितं एवं मधुकांडे निरूपितस्यात्मनः परोक्षादित्यादि [illegible] मुनिकांडं जल्पन्यायप्रधानेन
स्वप्रमाणकेन निरूपितस्य स्वस्यैव वादन्यायेन स्वरूपनिर्णायकाय वा गार्ग्यादिवादेषु दृष्टिद्वारा इत्यादिना जागराद्यवस्थाविश्वादि
प्रदर्शनेन तुरीयं नेति नेत्यादिना शास्त्रसमाप्तमुपदिष्टं इदानीं पूर्वोक्तजागराद्यवस्थात्रयसमष्टितानेकविप्रतिपत्ति
निरासपूर्वकं स्वयंप्रकाशानतिशयानंदस्वभाव[illegible] पूर्वोक्तमेवात्मानमधिगमयितुं ज्योतिर्ब्राह्मणमार
भ्यते जनकं ह वैदेहं याज्ञवल्क्यो जगामेति विद्याग्रहणे शिष्यस्य [illegible] आचारविधिप्रकाशनार्थं विद्याप्रवृत्त्यर्थं च यथा
ख्यायिका [illegible] जनकं वैदेहं प्रति याज्ञवल्क्यो योगक्षेमार्थं जगाम गतवान् स गच्छन् मया याज्ञवल्क्येनाहं किंचिद्

जनकं ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदतुस्तस्मै ह
याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तं हास्मै ददौ तं ह सम्राडेव पूर्वः पप्रच्छ १

पि न वदिष्य इति मेने विचारयामास यद्वा स एनेनेति [illegible] तथा च एतेन राज्ञा सह संवदिष्य इत्यभिप्रायवान् वैदेहं जनकं जगामेत्यर्थः
न वदिष्य इति मेने कथं पुनः राजकृतेषु प्रश्नेषूत्तरदानेन मुनेः स्वप्रतिज्ञाहानौ को हेतुरित्यपेक्षायां स वदिष्य इति च व्याख्या
नं वरदानमेव हेतुरिति कथयितुं कर्मकांडे वृत्तामाख्यायिकामाह अथ ह यज्जनकश्च वैदेह इत्यादिना ह किल पूर्वं कर्मकां
डे वैदेहो जनको याज्ञवल्क्यश्च परस्परमग्निहोत्रनिमित्तं समूदतुः संवादं कृतवन्तौ तत्र जनकस्याग्निहोत्रविषये विज्ञाने विशे
षमुपलभ्य परितुष्टो याज्ञवल्क्यस्तस्मै जनकाय ह किल वरं ददौ वरं वृणीष्वेत्युक्तवानित्यर्थः स जनको ह किल कामप्रश्नमेव स्वेच्छाप्रश्नमे
व वव्रे वरं वृतवान् तं च वरं याज्ञवल्क्यो हास्मै राज्ञे ददौ दत्तवान् एवं प्राप्तवरो राजा किं कृतवानित्याह तं ह सम्राडेवेति पूर्वः इत्यत्र लिं
गमविवक्षितं न वदिष्य इत्यागतं तूष्णीं भूतं तं सम्राडेव पूर्वः पूर्वं पप्रच्छ लब्धवरत्वात् स्पृष्टवानिति भावः १ २२२२२२२२२२२२२ १

याज्ञवल्क्य किंज्योतिरयं पुरुष इति आदित्यज्योतिः सम्राडिति होवाच आदित्येनैवायं ज्योतिषास्ते पल्ययते
कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य २ किंप्रश्नोऽयमपेक्षितो यां प्रत्यगात्मचैतन्यस्वरूपं जिज्ञासमा
नः कार्यकरणसंघातात्मा पुरुषो ज्योतिर्निर्वृत्यं मासनगमनादिकार्यं स्वात्मनैव ज्योतिषानुगृहीतोऽभिवर्तया
न किं वा स्वव्यतिरिक्तेनेति संदिहानः पृच्छति याज्ञवल्क्य किंज्योतिरयं पुरुष इतीति हे याज्ञवल्क्यायं कृत्स्नः
कार्यकरणसंघातरूपः शिरःपाण्यादिमान् पिण्डः किंज्योतिः किंज्योतिरस्य विद्यते स किंज्योतिर्येन ज्योतिषानुगृ
हीतोऽयमासनादि व्यवहारं करोतीति पृच्छतीत्यर्थः तत्किं देहादितरद्व्यतिरिक्तं वेति प्रष्टुरभिप्रायं जानन्मुनिरयं हि
ज्ञोऽव्यतिरिक्तं ज्योतिरेव पृच्छतीति तथाविधमेवोत्तरं सर्वं ज्योतीरहितं स्वप्नाद्यवस्थायां विविक्तं तथा बोधयितुकामो
जागरिते तावत् दृष्टान्तभूतान्यादित्यादीनि बाह्यानि ज्योतींष्युपन्यस्यन्नीति दर्शयति आदित्येति आदित्यो ज्योति
रस्येत्यादित्यज्योतिः सम्राडिति होवाच याज्ञवल्क्यस्तदेवोपपादयति आदित्येनैवायं ज्योतिषास्ते इति आदित्येनैव चक्षु
षोऽनुग्राहकेण देहकरणाव्यतिरिक्तेनैवायं प्राकृतः पुरुष आस्ते उपविशति पल्ययते पर्येति गच्छतीत्यर्थः तत्र उपसं
गम्यायतनाविति पर्येत्यस्य तत्र गत्वा तत्र एवं वा तत्र कर्म कुरुते पश्चाद्विपर्येति निवर्तत इत्यर्थः संघातादि
व्यतिरिक्तमेव ज्योतिरासनादिकारणमित्युक्तं राजाङ्गीकरोति एवमेवैतत् याज्ञवल्क्येति २ अस्तमित आदित्ये
याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा ज्योतिः सम्राडिति होवाच चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरु
ते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ३ यद्यप्येकेनैवादित्यपर्यायेणाग्निग्रहसमवस्थापि बहवो दृष्टान्ता व्याख्या
तव्याः ष्टव्यन्तीति मत्वा प्रश्नप्रतिवचनाभ्यां ज्योतिःपर्यायान्तराणि दर्शयति अस्तमित आदित्य इत्यादि कण्डिकाचतु
ष्टयेन कतम आत्मेत्यतः प्राक्तनेन पक्षविशेषोऽव्याख्यायते किंज्योतिरेवायं पुरुष इति प्रश्नं दृढीकर्तुं सर्वत्रैवकारः

चंद्रो ज्योतिरस्य सचंद्रज्योतिः ३ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते किंज्योतिरेवायंपुरुष इत्यग्निर्ज्यो
२ तिः सम्राडिति होवाचाग्निनैवायंज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीत्येवमेवैतद्याज्ञवल्क्य ४ एवमग्नि
ज्योतिरस्याग्निज्योतिरित्येवं सर्वत्र बोद्धव्यं अग्निनैवायमित्यत्र स्वभावमणिपादीनामप्युपलक्षणं तेनोपि कुरु
षप्रवृत्तिदर्शनादित्यर्थः ४ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेग्नौ किंज्योतिरेवायंपुरु
ष इति वाग्ज्योतिः सम्राडिति होवाच वाचैवायंज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति तस्माद्वै सम्राडपि यत्र स्वः
पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ५ वाचैवायमित्यत्र वाक्शब्देन शब्दः परि
गृह्यते तेनेंद्रियं तस्मिन् हि शब्दाख्ये विषये श्रोत्रं संवद्धं सत्यां मनादिज्योतिः कार्यदर्शनात् ननु शब्दस्यादित्यादिवज्ज्योतिष्ट्व
स्याप्रसिद्धेः कथं तस्य ज्योतिष्ट्वं नाम ननाविकार्ये हेतुतेति चेन्न उच्यते प्रथमं तावत् श्रोत्रेंद्रियं दीपनेदीप्ते च तस्मिन् मना
स विवेकमुपजायते तेन च मनसा बाह्यचेष्टां प्रतिपद्यते मनसा ह्येव पश्यति मनसा शृणोतीति श्रुतेरि
त्येतत्सर्वमभिप्रेत्याह तस्माद्वै सम्राडपि यत्र स्वः पाणिरिति यस्मादेव सम्यग्वाचा ज्योतिषायं व्यवहरतीति तस्मात्स्वा
सक्तं वाचो ज्योतिष्ट्वं कथं हे सम्राट् यत्र यस्मिन् काले प्रावृड्रात्र्यादौ स्वः स्वकीयोपि पाणिर्हस्तो न विनिर्ज्ञायते विस्पष्टं न
दृश्यते अथ तस्मिन्काले वा स्वज्योतिषोऽभावेन सर्वचेष्टानिरोधप्राप्ते यत्र यस्मिन्प्रदेशे वागुच्चरति कश्चित्तस्मा
द्वाक्शब्दात्कर्णद्वारोत्थितेन शब्देन ज्योतिषा तत्र तस्मिन्प्रदेशे उपन्येति गच्छत्येवं संनिहितो भवति मार्गे ह्येवाप्र
तिपद्यत इति यावत् एतद्वाग्ज्योतिष्ट्वं गंधादेरप्युपलक्षणं तेषामपि शब्दवत्प्रवृत्त्यादिहेतुत्वादिति भावः ५
अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेग्नौ शांतायां वाचि किंज्योतिरेवायंपुरुष इत्यात्मज्योतिः सम्रा २
डिति होवाचात्मनैवायंज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति ६ एतावतायो व्यवहारः स्वप्ने हृष्टे देहेंद्रियाद्

व्यतिरिक्तज्योतिःसाध्यो यथादित्यादिसाध्यो जाग्रत्व्यवहार इति व्याप्तिः सिद्धा एवं सति न्यायां व्याप्तौ स्वप्नसुषुप्त्योर
पि देहसंगामवियोगादेशांतरागमनादेः रूपान्तस्य च ज्योतिः कार्यस्य दर्शनाद्भवितव्यं तत्राप्यतिरिक्तेन केन
चित्तज्योतिषेत्यनुमानतो ज्योतिर्यद्व्यादिभ्यत्वमन्यनां ज्योतिषां तत्र योग्यानुपलब्धिबाधितत्वात्को नु ज्योति
षा तदाऽसौ व्यवहारं करोतीति जिताधिदेशेव राजा पृच्छति इत्यूयति अस्तमित आदित्यादिनास्तरमाह आत्मज्योतिः
सम्राडिति होवाचेति आत्मैव ज्योतिरस्य स तथा आत्मेति कार्यकरणातिरिक्तं तद्वभासकमपराधीनप्रकाशं ज्यो
तिरभिधीयते तस्यात्मनो ज्योतिषोऽर्थित्वं तस्यस्य परिदिषि लक्षणस्य कार्येणान्वयमाह आत्मनैवायं ज्योति
षास्त इत्यादिना ६ कतम आत्मेति योयं विज्ञानमयः पुरुषः प्राणेषु हृद्यंतर्ज्योतिः सः समानः सन्नुभौ लोकौ संचर
ति ध्यायतीव लेलायतीव स धीः स्वप्नो भूत्वेमं लोकमतिक्रामति ७ यद्यपि संघातानुग्राहकमात्मज्योतिः संघातातिरिक्तं त
द्विजातीयं चेति व्याप्तेर्निर्णीतं तथापि सूक्ष्मन्यायस्य दुर्विज्ञेयत्वादनुग्राहकादित्यादेरनुग्राह्यसंघातसमानजातीय
त्वदर्शनाच्चक्षुरादिव्यतिरिक्तत्वनिश्चयाभावात्संदिहानो राजा पृच्छति कतम आत्मेतीति कोसावात्मा किंस्वरूप इ
ति प्रश्नार्थः बुद्ध्यवभासकः स्वयमनवभासमान आत्मेति प्रतिवचनमाह योयं विज्ञानमयः पुरुषः प्राणेष्विति हे राजन्
य आत्मा त्वया पृष्टः सोयं विज्ञानमयः विज्ञायतेऽनेनेति व्युत्पत्तेर्विज्ञानं बुद्धिस्तन्मयः तत्प्रायो विज्ञानमयः पुरुषो नित्यपू
र्ण इत्यर्थः पुरुष एवेदं सर्वमिति श्रुतेः प्राणेष्विति सामीप्यलक्षणा सप्तमी विज्ञानमयस्य तद्व्यतिरेकप्रदर्शनार्था यो हि येषु
भवति तद्व्यतिरिक्त एव भवति अन्तः प्राणेष्विति प्राणेभ्यो व्यतिरिक्त इत्यर्थः एवं प्राणसमीपस्थो विज्ञानमय इत्युक्ते
प्राणसाजात्यं तस्य स्यादतो विशिनष्टि हृद्यंतर्ज्योतिरिति हृच्छब्दो मांसपिण्डविषयः तात्स्थ्यात्तत्रस्थ हृच्छब्देन लक्षणया बु
द्धिरुच्यते हृदि बुद्धावंतर्वर्तमानं ज्योतिरात्मा आत्मनैवायं ज्योतिषास्त इत्यादौ तस्य ज्योतिष्ट्वेन प्रकृतत्वात् पूर्णो बु
द्धपरिणामिव्यक्तः सर्वावभासकः स्वतो निरतिशयस्वप्रकाशकस्वभाव आत्मेति वाक्यार्थः एवमात्मनो नित्यमुक्तस्या

विद्या। यावुद्ध्यादिनादात्माध्यासादेवसंसारित्वमिति दर्शयितुं तस्य देहातिरिक्ततयात्मनः स्फुटत्वप्रदर्शनाय
३ वा स्वप्नं प्रक्रमते स समानः सन्निति यो ऽयं हृद्यन्तर्ज्योतिः पुरुषः स आत्मा स समानः सन् हृदयस्थाया बुद्धेः प्रकृतत्वात्सं
निहितत्वेन तया समानः सदृशः अन्योन्यधर्माध्यासेन तत्स्वभावः पिंडवत्तादात्म्यमापन्नः सन्नुभौ लोकौ प्रतिपन्नप्रतिपत्तव्यावि
हलोकपरलोकावनुक्रमेणोपात्तदेहेंद्रियसंघातं त्यजन्नन्यं चोपाददत्संचरति परित्यजति आत्मा संचरतीति क्रमेणानु
स्यूततः संचरणमित्यर्थः एतदेव प्रत्यक्षरूपेणोन्नीय दर्शयति ध्यायतीव लेलायतीवेति यतो ध्यानव्यापारवती बुद्धिस्त
त्संबंधेन चित्स्वभावज्योतीरूपेणावभासयंस्तत्सदृश आत्मा ध्यायतीव ध्यानं करोतीव यथा चक्षुः कोणे लोहपिंडमवभास
कत्वेनानुगतो वह्निरिष्यते तु क्षणे इव प्रतीयते न तु स्वतः तथा लेलायतीव चलतीव बुद्ध्यादिषु करणेषु प्राणादिषु वायुषु
चलत्सु तदवभासकत्वात्तत्समानत्वादात्मापि चलतीवेति प्रतीयते यथा चलत्सु नानाविततरङ्गेषु नीरस्थार्कश्चाञ्चलं
तीवेति प्रतीयते न तु स्वतः न तु ज्योतीरूपस्यात्मनः परमार्थतो ध्याने चलने वेत्यर्थः कुतो हेतोरेतदवगम्यत इत्यत
आह स धीः स्वप्नो इति प्रकृतत्वादात्मा यस्मात्स धीः बुद्ध्यैक्यमापन्नः स्वप्नो भूत्वा स्वप्नाकारपरिणाधीवृत्त्यवभासकत्वे
न तदाकारो भूत्वा इमं लोकं जागरितलक्षणं लौकिकशास्त्रीयव्यवहारास्पदं कार्यकरणसंघातमतिक्रामति त्यजती
त्यतिक्रामति तदभिमानं त्यजतीत्यर्थः ७ स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्
क्रामन्म्रियमाणः पाप्मनो विजहाति मृत्यो रूपाणि ८ यथैकस्मिन्देहे स्वप्नजागरिते संचरतन्नात्मनो देहाद्व्य
तिरेकस्तथेहलोकपरलोकयोः संचारोऽप्यस्ति तस्य तद्व्यतिरेकश्चेत्येतद्दर्शयति स वा अयं पुरुषो जायमान इति
सोऽयं प्रकृतः पुरुषो जायमानः पाप्मभिः संसृज्यत इत्यन्वयः नात्मनो जायमानत्वं घटादिवत्स्वरूपेणाभिव्यक्त्या मा
नत्वं किं तु शरीरं देहेंद्रियादिसंघातमभिसंपद्यमानस्तत्रात्मत्वाभिमानं प्रतिपद्यमान इत्यर्थः जायमाने शरीरे आत्मा ३
जमान एव जायत इत्युक्तं भवति वैशब्दोऽवधारणार्थोऽभिसंपद्यमान एवेत्यत्र संबध्यते पाप्मशब्दो धर्माधर्मयोरुपल

त्वात् कः पाप्मशब्देनोद्दिष्टः संबध्यते तु मात्रं विवक्षितं न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्यन्तरात्
पापाच्च पाप्मनिर्देशो ऽनर्थैः कार्यकरणैः संसृज्यते संयुज्यते शरीरात्मत्वेनाभिमन्यमानः पुरुष इत्यर्थः स एव
पुनर्देहाद्यारम्भककर्मक्षये सति म्रियमाणः सन्नुत्क्रामंछरीरान्तरं प्रत्युत्क्रामन् स्थानेन संसृष्टान् पाप्म
नः कार्यकरणलक्षणान् विजहातीति परित्यजतीत्यात्माभिमानत्यागमात्रेणैव तैर्वियुज्यत इत्यर्थः म्रियमाण
इत्यस्य व्याख्यानमुत्क्रामन्निति तथा मृत्यो रूपाणि च विजहातीत्यस्य च यः मृत्युरज्ञानं तस्य रूपाण्यहंकारादिका
र्यकरणानि निरूप्यन्ते प्रमीयन्त इति रूपाणि अन्तःकरणादिकं नामान्तःस्थानाविकं वाङ्क्रिरिवी स्यस्व ताबः स्वाना
त्विके सति परित्यागायोगात् इति शेषः ८ तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च
संध्यं तृतीयं स्वप्नस्थानं तस्मिन् संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकं च ८ एवमुत्क्रामन् म्रिय
माणः शरीरमात्मत्वेन संपश्यमान इत्यागमवशात् परलोकास्तित्वसिद्धेः प्रत्यक्षेण तत्सिद्धं परलोकविषयं च प्रत्य
क्षमस्यन्तो नास्ति परलोक इत्याशंक्याह अस्ति परलोकः प्रत्यक्षसिद्ध इति प्रतिपादनाय तस्मिन् संध्ये स्थाने स्था
रन्तामपयन्त्रायेप्रस्वपिति त्यन्तः शाकनोग्रन्थः प्रवर्तिष्यते प्रथमं तत्र बुधो द्वाततनेन स्थानं उभे दर्शयति तस्य वा एतस्य
पुरुषस्य द्वे एव स्थाने भवत इति वेदप्रसिद्धो नस्यो तस्य प्रकृतस्य पुरुषस्य द्वे एव स्थाने भवतः न तु तृतीयं चतुर्थं वा
स्थानमस्तीति यावत् के ते द्वे स्थाने इदं च यद्वर्तमानं प्रतिपन्नजन्म शरीरेन्द्रियविषयसंबंधिस्वरूपादि वेदना
विशिष्टं प्रत्यक्षतो ऽनुभूयमानं परो लोक एव स्थानं परलोकस्थानं तद्देह शरीरादिवियोगोत्तरकालानुभाव्यं
द्वितीयं देहद्वय व्यतिरिक्तस्वप्नदेहस्यापि विद्यमानत्वात् कथं द्वे एवेत्यवधार्यते इत्यत आह संध्यं तृतीयमिति पूर्वा
परस्य यश्रवणात् द्वितीयं उपर्यथ पुनो द्वौ ततः ततस्तं दर्शयति तस्मिन् संध्ये स्थाने तिष्ठन्नुभे स्थाने इति संध्ये स्थाने स्वप्ने भू
त्वा तिष्ठन् वर्तमानः सन् इदं च परलोकस्थानं चेत्युभे स्थाने पश्यति एतदुक्तं भवति अत्राद्यं तु यस्मिन् स्वप्ने पश्यति तत्पू

र्जन्मानुभूतविषयमेव तद्वासनावासितः सन् पश्यति तदानीं वा तस्यैव हि कष्टत्रायस्यात्मनो वासनावान् मध्यमेतु
ध वयसीन्द्रियाणां स्थूलार्थग्रहणसामर्थ्याद् इहजन्मन्यनुभूतविषयकमेव स्वप्नं प्रायः पश्यति अन्तेव यसितु
नः परलोकप्रियास्फूर्तिविद्याकर्मोद्भिसंस्कृतो जाविजन्मविषयकं स्वप्नं प्रायः पश्यति तस्माद् अन्तेव यस्याद्वौ चेहजन्म
न्यसंज्ञा अनुमानस्य दर्शनं परलोकसञ्ज्ञावे तत्स्वस्त्वं प्रमाणमिति ९ अथ यथाक्रमोऽयं परलोकस्थाने भवति
तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति स यत्रायं प्रस्वपिति अस्य लोकस्य सर्वावतो मात्रामपादाय
स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति अत्रायं पुरुषः स्वयंज्योतिर्भवति १० ननु स्वप्नस्थानं
गत आत्मा किमाश्रितः सन् केन विधिना परलोकं पश्यतीत्यपेक्षायामाह अथ यथाक्रमोऽयं परलोकस्थाने भ
वतीति अथेति वाक्योपक्रमे अनेनाक्रम आश्रयोऽवष्टम्भो विद्याकर्मपूर्वप्रज्ञालक्षणः यादृश आक्रमो यस्यासौ
यं यथाक्रमोऽयं पुरुषः परलोकस्थाने भवति तन्निमित्ते यथाक्रमो भवति यादृशेन परलोकं प्रतिपत्तिसाधने
न विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवति तमाक्रमं परलोकस्थानाभिमुखीभूतं बीजभूतमाक्रम्यावष्टभ्यो
भयानुभयान्पाप्मनः पापफलानि दुःखानि आनन्दांश्च धर्मफलानि सुखविशेषांश्च पश्यतीत्यर्थः पूर्वमादित्यादिज्योतिरु
पाधेर्विविक्त आत्मज्योतिः कार्यदर्शनादयं प्रमाणान्तरज्योतिर्व्यवहारतो स्थूलकं इदानीमादित्यादिज्योतिर्विरहस्थे
स्वप्ने द्रष्टात्मा यथा साक्षादेव स्वप्रकाशस्वभावेन स्वप्रकाश इत्येवं गन्तुं शक्यते तथा प्रदर्शनायाह स यत्रायं प्रस्वपितीति स य
कृतात्मा यत्र यस्मिन्काले प्रस्वपिति निद्रां करोत्यत्र स्वापस्थाने मनुजनवनीतेत्यर्थः सन्न नक्तस्वप्नं प्रतिपद्यमानः किं
माश्रयः केन विधिना प्रतिपद्यत इत्याकाङ्क्षायामाह अस्य लोकस्य सर्वावत इति अस्य दृष्टस्य लोकस्य जागरि
तलक्षणस्य स्थूलदेहस्य कथंभूतस्य सर्वावतः सर्वमत्र वर्तते सर्वावान् तस्य सर्वावत्त्वं चास्य अध्यात्मं अधिदैवं वा आत्मा
सर्वभौतानां लोकसहस्रादेः आत्मत्वात् यद्वा सर्वाण्यभूतानि तदेति क मात्रा अध्यात्मादि विभागयुक्ताः संसर्गकारणभूता ध
अस्याविद्यैतदिति सर्वावानेव सर्वावान् देहः स्यादेव तस्य सर्वावतो मात्रामेकदेशमवयवमपादाय परिछिद्य गृहीत्वा

ग्रदृष्टवासनावासितः सन्नित्यर्थः इदानीं केन विधिना स्वप्नं प्रपद्यत इत्यत आह स्वयं विहत्येत्यादिना स्वप्नं प्रतिपर
द्यमानस्त्वात्मा स्वयमेव स्वरूपेणानन्तु करणानि देवतादिना विहत्य देहं पातयित्वा निश्चेष्टं कृत्वा तथा स्वयमेव स्वक
र्मानुसारि स्वप्नदेहं प्रातिभासिकं निर्माय निष्पाद्य स्वेन भासा स्वीयेन भावेन दीप्त्या स्वेनात्मीयेन मात्रोपादानेन रूपेण भासा
दीप्त्या सर्ववासनात्मकेनान्तःकरणवृत्तिप्रकाशरूपेणेति यावत् स्वेन ज्योतिषेति कर्तरि तृतीया स्वेनात्मज्योतिषाऽनु
प्रदर्शकस्वभावेन निर्मितं वस्तु विषयीकुर्वन् प्रस्वपितीति प्रस्वापप्रकारश्चोक्त इत्यर्थः फलितमाह अत्रायं पुरुष इति अत्रै
तस्मिन्स्वापावस्थायामयं पुरुष आत्मा स्वयमेव ज्योतिर्भवति आदित्यादेस्तदानीमनात्मवादीन्द्रियाणां चोपसंहृतत्वात्म
नसश्च विषयाकारेणोद्बोधपरिणामित्वात्परिशेषादात्मा स्वयंज्योतिरित्यर्थः १० ननु स्वप्नेऽपि सर्वस्यादित्यादेर्दृश्यमानत्वात्कथं
परिशेषात्स्वयंज्योतिष्ट्वसिद्धिरित्याशंकायां तस्य सर्वस्य वासनामात्रनिर्मितत्वात्तत्रात्मा विविक्तः स्वयंज्योतिरिति निश्चे
तुं स्वप्ने बाह्यरथाद्यभावं तावदाह न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान्रथयोगान्पथः सृजते न तत्रानं
दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः स्रवन्त्यः पुष्करिण्यो भवन्त्यथ वेशान्तान्स्रवन्तीः पुष्करिणीः
सृजते स हि कर्ता ११ न तत्र रथा न रथयोगा न पन्थानो भवन्तीति तत्र स्वप्ने रथाः प्रसिद्धा रथेषु युज्यन्त इति रथयोगा अश्वा
दयः पन्थानो रथमार्गाः एते प्रत्येकं न भवन्तीति तन्नभिः संबध्यते न सन्त्येवेत्यर्थः रथाद्यभाववोक्तिस्तदनुग्राहकेन्द्रियार
लोकादेरप्युपलक्षणार्थः ननु स्वप्ने रथादीनामनावश्यकत्वे तर्हि कथं भासन्त इत्याशंक्याह अथ पुनः रथान्रथयोगान्पथः
वासनात्मकान्सृजते एतच्च सर्वं चैतन्यमात्रावभासि स्वसाक्षिनो रूपप्रपंच इत्यर्थः एवमन्यस्यापि स्वप्ने दृश्यमानस्य बाह्यस्याभाव

प्रदर्शीनपुरः सर्ववासनात्मत्वं दर्शयति न तत्रानंदा मुदः प्रमुद इति तत्र स्वप्ने आनंदाः स्वरूपसामान्याभिमुदः पुत्रादिसंबंध
५ निमित्ता हर्षा मुद एव प्रकर्षीत्येताः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो नद्यः पुष्करिण्यस्तडागाः आनं
दाक्षयो वेशान्ताः स्वप्ने न संवंतीत्यथ तत्सर्वं सृजत इति पूर्ववत् व्याख्येयं इदं वा आत्मनैवायं ज्योतिषास्त इत्यादेः प्रपं
चः कथमेतत्सर्वमात्मा सृजतीत्याशंक्याह स हि कर्तेति हि यस्मात् स आत्मा कर्ता तस्मात् सृजतीति योजना न स्वत्र क
र्तृत्वं वास्तवमात्मनो निषिध्यते किंतु परिणममानवासनासाक्षितामात्रमेवेत्यर्थः ११ तदप्येते श्लोकाः स्वप्नेन शारीर
लि· मभिप्रहत्यासुप्तः सुप्तानभिचाकशीति शुक्रमादाय पुनरैति स्थानं हिरण्मयः पौरुष एकहंसः १२ इदानीमुक्तेऽर्थे
मंत्राणामपि संमतिरस्तीत्याह तदप्येते श्लोका इति तस्मिन्नुक्तेऽर्थे स्वयंज्योतिष्ट्वादिलक्षणे एते वक्ष्यमाणाः श्लोकाः
मंत्राः संतीति शेषः तत्र स्वप्नप्रवेशतत्साक्षित्वप्रकाशकं मंत्रार्द्धं पठति स्वप्नेन शारीरमिति स आत्मा स्वप्नेन स्वप्नभावित
वासनामात्रोपग्रहेण शारीरमिति स्वार्थे वृद्धिः शरीरमभिप्रहत्य निश्चेष्टमापाद्यात्तु स्वरूपशक्तिस्वाभाव्यात् स्वयम
सुप्तः सन् सुप्तान् वासनाकारेणोद्भूतान् अंतःकरणवृत्त्याश्रयान् बाह्याध्यात्मिकान् सर्वानेव भावान् स्वेन रूपेण
प्रत्यस्तमितान् अभिचाकशीति अलुप्तया आत्मदृष्ट्याभितः सर्वात्मना पश्यत्यवभासयतीत्यर्थः स्वप्नभोगक्षये पुन
र्जागरितमेतीति द्वितीयार्द्धेन दर्शयति शुक्रमादायेति शुक्रं शुद्धं ज्योतिष्मदिंद्रियादिमात्रारूपमादाय गृहीत्वा
पुनः स्वप्नहेतुकर्मोपशमाने तज्जाग्रद्भोगहेतुकर्मणा जागरितं स्थानमेति आगच्छतीति हिरण्मय इव चैतन्यज्यो
तिः स्वभावः पौरुषः पुरुषः स्वार्थे वृद्धिः एकहंसः एकश्चासौ हंसश्चेत्येकहंसः हंति गच्छतीत्युभयरूपं हंस इति ५
एक एव जाग्रत्स्वप्नाविहलोकपरलोकौ च हंति गच्छतीति हिनस्तीति वा एकहंस इत्यर्थः १२ प्राणेन रक्षन्नवरं कु

लायं बहिष्कुलायादमृतश्चरित्वा स ईयतेऽमृतो यत्र कामं हिरण्मयः पौरुष एकहंसः १२ पुनरपिस्व
प्नगतं विशेषं वक्तुं मंत्रांतरं पठति प्राणेन रक्षन्निति प्राणेन पंचवृत्तिकेन अपरं निकृष्टमनेकाशुचिसंघातत्वाद
त्यंतवीभत्सं कुलायं कोपृष्ठिकालीयत इति कुलायं नीडं शरीरमिति यावत् रक्षन् पालयन् अन्यथा मृतभ्रांतिः
स्यात्तस्मान्न क्षितिरित्यर्थः स्वयं चामृतोऽसंगः सन् तस्मात्कुलायाद्बहिश्चरित्वा यद्यपि शरीरस्थ एव स्वप्नं पश्यन्निति तथा
पि तत्स्यात्मनो देहस्थाकाशस्येव तत्संबंधाभावाद्बहिश्चरणमिव कृत्वेत्युच्यते बुद्धिसंचरणात्तदनुकुर्वन् संचरणमि
व कृत्वा यत्र कामं यत्र यत्र विषयेषूद्भूतवृत्तिः कामो भवति तं काममभृतो मरणधर्मासंलीयते गच्छति प्राप्नोतीत्यर्थः
१२ स्वप्नांत उच्चावचमीयमानः रूपाणि देवः कुरुते बहूनि उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् १३
पुनरपि स्वप्नस्थं विशेषांतरमाह स्वप्नांत इति स्वप्नांते स्वप्नस्थाने उच्चं देवादिभावमवचं तिर्यगादिभावं च उच्चं चावचं
चेत्युच्चावचमिति समाहारद्वंद्वः स्वकर्मोद्भासितैर्वासनामयमुत्कृष्टं निकृष्टं च स्वेनैवात्मना स्वयमीयमानो गम्यमानः
प्राप्नुवन्देवो द्योतनात्मको रूपाणि वासनामयानि शरीरजातानि बहूनि असंख्येयानि कुरुते तत्तत्स्फूर्तिप्रदत्वेनानु
वर्तते उत अपि स्त्रीभिः सह मोदमानो हसन्निव क्रीडमानश्च उत अपि जक्षद्दिव वयस्यादिभिः सह हसन्निव अपि भयानि बिभ्य
त्स्यादिति भयानि सिंहव्याघ्रादीनि पश्यन्निव भवतीत्यर्थः तथा चेवशब्दप्रयोगाद्यात्तवहेत्वेनावाच्यः स्वप्ने मृषात्वं नयाद्य
नु स्वोऽविद्यामयो मृषेति भावः १४ आराममस्य पश्यंति न तं कश्चन पश्यतीति तं नायतं बोधयेदित्याहुः दुर्भिषज्यं
हास्मै भवति यमेष न प्रतिपद्यते १५ एवं स्वप्ने निरूपिते किंपर्यवसितमित्यपेक्षायां तत्रात्मा विविक्तः स्वयंज्योतिः पर्य

वसितइतिप्रदर्शनायमंत्रशेषंभवति आराममस्य पश्यंतीति आस्यात्मनः आराममाक्रीडनं ग्रामनगरस्त्रीप्रभृतिदल्लाद्युपान
६ मार्गादिलक्षणं वासनानिर्मितमेव पश्यंति सर्वे जना इति शेषः न तु तमात्मानं तत्र विविक्तदृग्रूपत्वेनावस्थितं न तं क
श्चन कोऽपि पश्यति तस्मात्स्वप्ने दृश्यएव सन्नवभासत इति सिद्धमात्मनः स्वयंज्योतिष्ट्वमित्यर्थः इति शब्दो मंत्रोदाह
रणसमाप्त्यर्थः अहो नाम महीनता लोकस्य यदेकस्य दर्शनमपहरद् विविक्ततया नृत्यमानमप्यात्मानमयमहमस्मी
6 ति न पश्यतीति लोकं प्रति श्रुतिरस्ताऽनुक्रोशतीति मंत्रात्मिकेयं श्रुतिरित्यभिप्रायः किं च स्वप्ने गत आत्मा विविक्त एवे
त्यत्र लोकप्रसिद्धिरप्यस्तीत्याह तं नायतमिति तमात्मानं सुप्तमायतं सहसा न बोधयेदित्याहुरिति किल सकाशं जनाः लो
केकथयंतीत्यर्थः जाग्रद्देहगतेंद्रियद्वारात् तत्स्थानप्रबोधनाडीः परित्यज्यात्मा स्वप्ननाडीः प्रविष्टो विविक्त एव स्व
प्नेवर्त्तत इत्यभिप्रायः न चैवं स्वप्ने विविक्तस्तथापि किं सहसा प्रबोधने को दोष इत्यत आह दुर्भिषज्यं हास्मै इति य
स्माद्देशात् शुक्रमादाय परस्तात्स्थानमिंद्रियदेशमेव आत्मा पुनर्न प्रतिपद्यते सहसा प्रबोधितः कदाचित्तस्मात्ते
न्द्रियमात्रः प्रवेशयति तत्र चांध्यबाधिर्यादिदोषप्राप्तौ अस्य देहस्य दुर्भिषज्यं दुःखेन भिषक्कर्म भवति
कष्टेन चिकित्सनीयो देहो भवतीत्यर्थः अथो खल्वाहुः जागरितदेश एवास्यैष यानि ह्येव जाग्रत्पश्यति तानि सुप्त इ
त्यत्रायं पुरुषः स्वयंज्योतिर्भवतीत्येवमेवैतद् याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति १६ इदा
नीमस्य वादीमतं स्वयंज्योतिष्ट्वविघातकं दूषयितुं तस्मान्न बोधयितुं स्वमतपरिशुद्धये चैतदुपन्यस्यति अथो खल्वाहुः इ
जागरितदेश एवास्यैष इत्यादिना अथो अपि खल्वन्ये आहुः किं पक्षः प्रसिद्धो जागरितदेश एवास्य स्वप्नस्य विषयो न तु संध्य

मिदं स्थानान्तरमिह लोकपरलोकाख्यं व्याप्तिस्थितमित्यर्थः जागरितदेशस्यैव स्वप्नविषयत्वे हेतुमाचष्टे तत इत्याह
यानि ह्येव जाग्रत्पश्यति हि यस्माद्वस्त्वादीनि पदार्थजातानि यानि जाग्रज्जागरितदेशे पश्यति लोकः किं कृतान्येव स्वप्नेऽपि
पश्यतीत्यर्थः इति शङ्कोमनन्तरोपन्यासमसमाप्त्यर्थः ननु कथमेतावता स्वयंज्योतिष्ट्वं विद्यात इति चेच्छृणु यदि
जागरितदेश एवायं स्वप्नो जातस्तदा जागरित इव स्वप्नेऽपि कार्यकरणसंघातमिश्रितत्वेन ततो व्यतिरिक्तस्वयंज्यो
तिः सिद्धेदिति स्वयंज्योतिष्ट्वं बाधितं स्यादिति अयं च पूर्वैः पक्षोऽभिहितेत्वं ज्ञातोऽतिपवाग्रं पचतीति न्यायेनार्थक्र
मपरिग्रहेण स्वप्नोऽयं प्रस्वपितीत्यतः प्रागवगन्तव्यः पूर्वपक्षस्याप्रामाण्यमित्यस्यैव क्रमस्य न्याय्यत्वात् संध्यस्थानस्य
तृतीयस्यापेक्षकत्वेन तत्रोचितत्वाच्चेति दृष्टव्यं नैतत्सारं स्वप्ने इत्यादिना युक्तितः प्रमाणेन स्वप्नस्य मृषात्वमिति रूपणं
कृतमित्येतन्न सूच्यं तीक्ष्णं तिरन्तरमाह अत्रायं पुरुषः स्वयंज्योतिर्भवतीति अक्षरार्थः पूर्ववत् एवं मुनिना
स्वयंज्योतिरात्मेति सपरिकरमुपसंहारे कृते मुनिवचनं राजाङ्गीकरोति एवमेवैतद्याज्ञवल्क्येति हे याज्ञवल्क्य
एतद्भगवतोक्तं स्वप्नद्वारा मया स्वयंज्योतिष्ट्वमेव मे वदतः किं कृतवानसि राजेत्याह सोऽहं भगवते सहस्रं ददामि इति
येन त्वयैवं बोधितः सोऽहं जनको भगवते गुरवे तुभ्यं विद्याभिः कृतार्थः सहस्रं ददामि अर्पयीऽजवामिति संबध्यत इत्यर्थः
कतम आत्मेति पृष्टे योऽयं विज्ञानमय इत्यादिना देहेन्द्रियमनोबुद्धिप्राणेभ्यः कृतविवेचनः स्वयंज्योतिरात्मेति प्रतिव
चनेन निर्णीय निरूपरतः राजानुकामस्य प्रश्नवाक्यप्रोक्तस्य वृत्तेन कामकर्मादिसकलसंसारधर्मातीतत्वस्वरूपस्या
गन्तुं तस्य विजिज्ञासनस्य मोक्षस्य अनिर्धारितत्वात् तन्निश्चयाय मुनिमुच्छ्रादितिदर्शयति अत ऊर्ध्वं विमोक्षायैव
ब्रूहीति विशिष्टमोक्षो नवस्यनेनेति विमोक्षः सम्यक्ज्ञानं यतः स्वयंज्योतिष्ट्वरूपं मोक्षाङ्गमात्रमेव निर्णीतमतः

कारणादूर्ध्वं मानिति प्रणीयादृष्टेनेतरं विमोक्षायैव मोक्षसाधनभूतविद्यायै तु स्वात्मज्ञानायैव ब्रूहि यथा मोक्षस्तत्रासादि
जनको महत्स्वरात्मनः स्वप्नावेनस्य वृत्तिं तथा मामुपदिशेत्यर्थः॥२६॥ स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पु
रुष इत्येवं राज्ञा नियुक्तो मुनिर्मीह तत्रासाध्यभाव प्रदर्शनपुरःसरं तत्कारणभूतः कर्मलक्षणो मृत्युर्नात्मनः स्वभाव
इति दर्शयितुं प्रवर्तमानस्तावत्स्वप्नस्थानाज्जागरितदेशागमनमाह स वा एष एतस्मिन्स्वप्नान्त इति य एषः स्वप्ने दर्शितः
स्वयंज्योतिः स प्रकृत आत्मा वै प्रसिद्धः स्वप्नान्ते स्वप्नस्थाने रत्वा स्त्रीपुत्रादिसापेक्षं मनोवाक्कायचेष्टालक्षणं रमणं कृ
त्वा वासनामात्रसाधनः सन् चरित्वा इतस्ततोऽनेकधा चरणं कृत्वा दृष्ट्वैव पुण्यं च पापं चेति पुण्यं पुण्यफलं सुखं च पा
पं च पापफलं च दुःखमननुभूयैव पुनः स्वप्नादूर्ध्वं प्रतिपूर्वस्मात् गमनात्प्रातिलोम्येन न्यायं प्रतिन्यायमागमनं यथा स्या
त्तथा प्रतियोनि जागरितं संप्रगच्छति पूर्वं गृहीतवासनामपत्यानं प्रत्याद्रवति आगच्छतीत्यर्थः किमर्थमित्यत्राह
बुद्धान्तायैव जागरणायैव जागरणानुभवायैवेत्यर्थः अत्र दृष्ट्वैवेत्येवकारादात्मनः स्वप्ने पुण्यपापकर्तृत्वं व्याव
र्तितं वर्तितं तस्मान्नात्र प्राप्तावस्यासं दर्शयितुं पुनः प्रातृप्रयोगः प्रातिलोम्यवाची जागरितात्स्वप्ने स्वप्नात्सुषुप्तमि
त्याद्यनुलोम्यं तद्विपरीतं प्रातिलोम्यमिति प्रावासनावशवत्तः ननु स्वप्ने आत्मा मारणादिकं करोति चेत्तत्फलेनापि
संबध्यते यथा जागरिते कर्म कुर्वंस्तत्फलेन संबध्यते इत्याशंकां वारयति स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन
भवतीति स आत्मा तत्र स्वप्ने यत्किमपि पुण्यपापफलं पश्यति तेन दृष्टेनानन्वागतोऽननुबद्धो भवतीत्युत्तरार्थः॥ ७
स्वप्ने तावदात्मनः कर्तृत्वं न वास्तवमित्युक्तं अतो न स्वप्नकृतेन कर्मणात्मा बध्यते यदि वस्तुतः कर्ता स्यात्

[illegible]

एवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति १७॥
वध्येत न हि स्वप्नकृतेनाऽपेयपानादिना स्वात्मानं पापकारिणं मन्यते लोकः न कश्चिदपि तथा मन्यते न वा स्वर
कृऽहमपेयपानमकार्षमिति श्रुत्वा केचन प्रामाणिका गर्हयन्ति न स्वस्य संसर्गं परिहरन्ति ननु स्वप्ने चेन्द्रियदोषेऽप्यास्ति यं दृष्ट्वा द
रेतश्छेदे प्रायश्चित्तं तु तस्योक्तं प्राणायामाः षोडशेति वचनेन स्वप्ने रेतःस्खलने निमित्तप्रायश्चित्तविधानमात्मनः स्वप्ने
कर्मसंबंधाभावे नोपपद्यत इति चेत् शृणु येन स्वप्नसंसर्गनिमित्तं प्रायश्चित्तं किंतु स्वस्मादेवेन्द्रियस्खलनाद्दोषा
राद्रेतसश्च्यवनानिमित्तेन स्वजागरिते प्रपन्नत्वनिमित्तं च स्त्र्यन्यथा परनारीसंगमनिमित्तमपि प्रायश्चित्तं वि
दध्यात् न तु स्वप्नत नन्नलिनिमित्तमात्रं तस्मात् न स्वप्नकृतेन कर्मणा तत्फलेन चात्मा संबध्यत इति तात्पर्यार्थः क
र्यं स्वप्ने दृष्टेनात्मानन्वागत इत्यपेक्षायां हेतुमाह असंगो ह्ययं पुरुष इति यस्मादयं पुरुषोऽसंगस्तस्माद
नन्वागत इत्यर्थः मुनिनोक्तमात्मनः कर्मासंबंधं राजांगीकरोति एवमेतद्याज्ञवल्क्येति हे याज्ञवल्क्य एतद्भगवतो
क्तं स्वप्नेऽप्यात्मनः कर्मासंबद्धत्वमेवमेवेत्यंगीकृतं राजेत्यर्थः मुनिनिरूपितेऽर्थे स्वात्मनो दार्ढ्यं सूचयन् राजा मद्द
णां प्रतिजानीते सोऽहं भगवते सहस्रं ददामीति उक्तार्थमेतत् राजा मुनेः स्वस्मिन्नेराकांक्ष्यं शंकां वारयति अत
ऊर्ध्वं विमोक्षायैव ब्रूहीतीति कर्मप्रविवेकस्यापि मोक्षैकहेतुत्वाद्विमोक्षायैव ब्रूहीति पृष्टवानित्यर्थः १७
तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बु
द्धान्तं च १८ एवं स वा एष एतस्मिन्स्वप्नान्ते इत्यनया कंडिकया स्वतंत्रज्योतिरात्मा वस्त्वा द्वयेऽपि कामकर्मप्रयुक्त
स्थानद्वयसंचरणात् संसारधर्मैरसंस्पृष्टोऽवधारितोऽसंगत्वादिति प्रतिपादितं तत्र संचरणमपि कथं तेनेन न व
शोकिय तत इत्यत्र दृष्टान्तमुच्यते यथा स्वप्नान्तबुद्धान्तात्मकावस्थाद्वयस्यापि मिथो व्यभिचारात्तदुभयस्तस्मात्

नस्तद्धितत्वणत्वंनकृतकामकर्मात्मकादासंगान्मुक्तत्वाद्विविक्तत्वंचप्रदर्शितंतत्रेदानींदृष्टान्तमाह तद्यथा
९ महामत्स्यइति तन्मत्रेतस्मिन्नुक्तेऽर्थेतद्यास्त्वमिदमिति वायथालोके महामत्स्यः महान्ग्रासो मत्स्यश्चेति
महामत्स्यो नादेयःस्रोतसाऽहार्यो वशीकृतलोमत्स्योऽहंतःमहत्त्वविशेषणेन तादृग्रूपस्याविवक्षितत्वा
त्तथा स मत्स्यो नद्याः पूर्वमपरंचेत्युभेकूले तीरेनदीतोऽनुक्रमेण संचरति तेनतस्याविवक्षेत्ययमन्त्रच्छेदचारीत्वा
ज्ञोगिनत्वएव सन्संचरतीत्यर्थः उक्तदृष्टान्ते दार्ष्टान्तिके योजयति एवमेवायंपुरुष एतावुभावन्तावनुसंचरती
ति यथायंस्वप्नांतएव मेवायंपुरुषःस्वप्नान्तंचस्वप्नंबुद्धान्तंचजागरितमित्येतावुभावतोऽनुक्रमेणासंचरतीत्य
तोऽत्रवस्थाद्वयेपुरुषरूपाद्वात्मन्यर्थः अतोऽस्यात्मनः संसारित्वमाविद्यकमेव नस्वतस्तस्योतिद्वातायांतुस्वतः
सिद्धैवतस्यमुक्तिरितिमवाऽत्रपुरुषोजायमानस्यास्य मत्स्यवाक्यान्तस्याग्रेथस्यसमुदायार्थः १८ तद्यथा
स्मिन्नाकाशेश्येनोवासुपर्णोवाविपरिपत्यश्रान्तःसंहत्यपक्षौसंलयायैवध्रियतएवमेवायंपुरुषएतस्माअन्ताय
धावतियत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यति १९ एवंमहामत्स्यदृष्टान्तोपन्यासेनावस्थाद्वयेऽपि
पद्यपिकार्यकरणादिभ्योव्यतिरिक्तंनित्यशुद्धबुद्धमुक्तस्वभावमात्मरूपंदर्शितंतथाप्येकैकस्मिन्नावस्थेएकैकव्य
तिरिक्तस्यैवप्रदर्शनात्तत्पुंजीकृत्यतथाविधमात्मस्वरूपंप्रदर्शितंअतःसुषुप्तौतथाविधमात्मस्वरूपंसकृदेवस्फा
स्वेप्रतिपत्तुंशक्यमितितद्यान्त्रस्यैतदात्मकाममित्यादिना तथाप्रदर्शयितुं तथाविधस्यसुषुप्तिप्राप्तौदृष्टान्तत्वेनश्येन
वाक्यंप्रवर्तते इतिश्रीमतांशंकराचार्याणांनवनाटिकावार्तिककृद्वचनाटिकायामेवंस्वप्नबुद्धान्तयोःसंचरतस्त्वात्मनःसं ८
सारवित्वत्वगणात्वेमहामत्स्यदृष्टान्तेनउक्तःइदानींसुषुप्तावपितद्वितत्वगणत्वंदर्शयितुंश्येनादिदृष्टान्तमाह तद्यथा